योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०६०

श्रीवसिष्ठ उवाच ।

एतत्ते कथितं राम दृश्यदोषनिवृत्तये ।

लीलोपाख्यानमनघं घनतां जगतस्त्यज ।। १

शान्तैव दृश्यसत्तास्याः शमनं नोपयुज्यते ।

सतो हि मार्जनक्लेशो नासतस्तु कदाचन ।। २

ज्ञानेनाकाशरूपेण दृश्यं ज्ञेयस्वरूपकम् ।

इत्येकीभूतमालोक्य ज्ञस्तिष्ठत्यम्बरोपमः ।। ३

पृथ्व्यादिरहितेनेदं चिद्भासैव स्वयंभुवा ।

साधितं यदि सिद्धेन ततः स्वात्मनि साधितम् ।। ४

संविद्यथा या यतते तथा सैव व्यवस्थिता ।

विसृष्टा सृष्टिविन्नद्यां यावद्यत्नान्न रोधिता ।। ५

चिदाकाशावभासोऽयं जगदित्यवबुध्यते ।

चिद्व्योम्न्येवात्मनि स्वच्छे परमाणुकणं प्रति ।। ६

एवमस्या मुधाभ्रान्तेः का सत्ता केव वासना ।

का वास्था का च नियतिः कावश्यंभावितोच्यताम् ७

सर्वं चैतद्यथादृष्टं स्थितमित्थमखण्डितम् ।

मायैवेयमनन्तेयं न च मायास्ति काचन ।। ८

श्रीराम उवाच ।

अहो नु परमा दृष्टिर्दर्शिता भगवंस्त्वया ।

दावाग्निदग्धकक्षाणां दाहशान्तौ कलैन्दवी ।। ९

अहो नु सुचिरेणाद्य ज्ञातं ज्ञातव्यमक्षतम् ।

मया यथेदं यच्चेदं यादृग् ज्ञेयं यतो यदा ।। १०

शाम्यामीव द्विजश्रेष्ठ निर्वामीव विकल्पयन् ।

एतदाख्यानमाश्चर्यं व्याख्यानं शास्त्रदृष्टिषु ।। ११

इमं मे भगवन्ब्रूहि संशयं सर्वकोविद ।

तव पातुं न तृप्तोऽस्मि श्रोत्रपात्रैर्वचोमृतम् ।। १२

स सर्गत्रितये कालो लीलाभर्तुर्हि योगतः ।

स क्वचित्किमहोरात्रः क्वचित्किं मासमात्रकः ।। १५

क्वचित्किं बहुवर्षाणि कस्यचित्किमु पेलवः ।

कस्यचित्किं महादीर्घः कस्यचित्किं क्षणः स्थितः ।। १४

इति मे भगवन्बूहि त्वं यथावदनुग्रहात् ।

सकृच्छ्रुतं न विश्रान्तिमेति लोष्टे यथा जलम् ।। १५

श्रीवसिष्ठ उवाच ।

येन येन यथा यद्यद्यदा संवेद्यतेऽनघ ।

तेन तेन तथा तत्तत्तदा समनुभूयते ।। १६

अमृतत्वं विषं याति सदैवामृतवेदनात् ।

शत्रुर्मित्रत्वमायाति मित्रसंवित्तिवेदनात् ।। १७

यथा भावितमेतेषां पदार्थानां निजं वपुः ।

तदेव हि चिराभ्यासान्नियतेर्वशमायतम् ।। १८

कचनैकात्मिकैषा चिद्यथा कचति यादृशम् ।

तथा तथाशु भवति तत्स्वभावैककारणात् ।। १९

निमेषे यदि कल्पौघसंविदं परिविन्दति ।

निमेष एव तत्कल्पो भवत्यत्र न संशयः ।। २०

कल्पे यदि निमेषत्वं वेत्ति कल्पोऽप्यसौ ततः ।

निमेषीभवति क्षिप्रं तादृग्रूपात्मिका हि चित् ।। २१

दुःखितस्य निशा कल्पः सुखितस्यैव च क्षणः ।

क्षणः स्वप्ने भवेत्कल्पः कल्पश्च भवति क्षणः ।। २२

यथा च मृत्वा जातोऽहं तरुणो यौवनस्थितः ।

यातोऽस्मि योजनशतं स्वप्न इत्यनुभूयते ।। २३

रात्रिं द्वादशवर्षाणि हरिश्चन्द्रोऽनुभूतवान् ।

लवणो भुक्तवानायुरेकरात्र्या समाः शतम् ।। २४

यन्मुहूर्तः प्रजेशस्य स मनोर्जीवितं मुनेः ।

जीवितं यद्विरिञ्चस्य तद्दिनं किल चक्रिणः ।। २५

विष्णोर्यज्जीवितं राम तद्वृषाङ्कस्य वासरः ।

ध्यानप्रक्षीणचित्तस्य न दिनानि न रात्रयः ।। २६

न पदार्था न च जगत्सत्यमात्मनि योगिनः ।

मधुरं कटुतामेति कटुभावेन चिन्तितम् ।। २७

कटु चायाति माधुर्यं मधुरत्वेन चिन्तितम् ।

मित्रबुद्ध्या द्विषन्मित्रं रिपुबुद्ध्या रिपुः सुहृत् ।। २८

भवतीति महाबाहो यथासंवेदनं जगत् ।

अनभ्यस्ताः पदार्था ये शास्त्रपाठजपादयः ।। २९

तेषां संवेदनाभ्यासान्नूनमभ्येति साम्यता ।

नौयायिनां भ्रमार्तानां वेदनाद्भूर्विवर्तते ।। ३०

अवेदनाभ्रमार्तानामपि नैषां विवर्तते ।

शून्यमाकीर्णतामेति वेदनात्स्वप्नदृक्ष्विव ।। ३१

वेदनात्पीतमानीलं शुक्लं वाप्यनुभूयते ।

आपद्वदुत्सवः खेदं करोति परिमोहतः ।। ३२

कुड्येऽपि ख इवाचारो दृष्टो नन्वविचारिणः ।

असद्यक्षो विमूढानां प्राणानप्यपकर्षति ।। ३३

वेदनात्स्वप्नवनिता जाग्रतीव रतिप्रदा ।

यद्यथाभासमायातं तत्तथा स्थिरतां गतम् ।। ३४

असदेव नभश्चैव नभ एव चिदात्मनि ।

शतहस्ताम्बुदच्छायानटनृत्तमिवाततम् ।। ३५

गगने मानसं स्पन्दं जगद्विद्धि न वस्तु तत् ।

मिथ्याज्ञानपिशाचस्य स्पन्ददर्शनमाकृति ।। ३६

मायामात्रकमेवेदमरोधकमभित्तिमत् ।

इदं भास्वरमाभातं स्वप्नसंदर्शनं स्थितम् ।। ३७

अपूर्वमेवासुप्तस्य नरस्येवोदितं विदुः ।

अचेता चेतति स्तम्भो यादृशं शालभञ्जिकाम् ।। ३८

परमार्थमहास्तम्भः सृष्टिं चेतति सादृशम् ।

यादृशो मे नरः पार्श्वे स्वप्ने क्षुब्धो महाभटैः ।। ३९

तादृशो ब्रह्मणः स्वर्गो बुद्ध एव सुषुप्तवत् ।

तृणगुल्मलतायुक्तः शिशिरान्ते यथा रसः ।। ४०

वासन्तः संस्थितो भूमौ तथा सर्गः परे पदे ।

यथा द्रवत्वं कनके स्थितमन्तरनुन्मिषत् ।। ४१

तथा स्थितः परे सर्ग आत्मवर्गादणावणौ ।

संनिवेशो यथाङ्गानामङ्गिनोऽनन्य आत्मनः ।। ४२

जगदेवमनङ्गस्य स्वात्मनो ब्रह्मणस्तथा ।

यादृगेकनरः स्वप्ने युद्धमन्यं नरं प्रति ।। ४३

तादृशं सदसद्रूपं स्वात्मेदं व्योमगं जगत् ।

महाकल्पान्तसर्गादौ चित्स्वभावमिदं जगत् ।। ४४

कारणत्वं मिथः पश्चादसदेति न वास्तवम् ।

मुक्तेऽस्मिन्ब्रह्मणि यदि ब्रह्मान्यः स्मृतिजो भवेत् ।

तत्स्मृतिज्ञप्तिजे सर्गे स्थितैव ज्ञप्तिमात्रता ।। ४५

श्रीराम उवाच ।

पौराणां मन्त्रिमुख्यानां विदूरथकुलक्रमः ।

सममेव कथं तत्र सर्वेषां प्रतिभासितः ।। ४६

श्रीवसिष्ठ उवाच ।

चितः समनुवर्तन्ते मुख्यायाः सर्वसंविदः ।
यथा विपुलवात्यायाः सामान्या वातलेखिकाः ।। ४७
परस्परानुसारेण तथारूपेण संविदः ।
कचितास्ताः प्रजापालप्रजावास्तव्यमन्त्रिणः ।। ४८
एवंरूपात्कुलाज्जातो राजास्माकमयं त्वसौ ।
कचिता इव वास्तव्यविदो वैदूरथे पुरे ।। ४९
कचने चित्स्वभावस्य न च कारणमार्गणम् ।
युक्तं महामणेर्भासामिवान्यत्र स्वभावतः ।। ५०
अहमेवं कुलाचारे राजा स्यामेवमित्यपि ।
विदूरथविदो रत्नादुदिता प्रतिभा यथा ।। ५१
यावन्तो जन्तवो यस्मिन्ये ये सर्गे यदा यदा ।
ते सर्वगत्वाच्चिद्धातोरन्योन्यादर्शतां गताः ।। ५२
तीव्रवेगवती या स्यात्तत्र संविदकम्पिता ।
सैवायाति परं स्थैर्यमामोक्षं त्वेकरूपिणी ।। ५३
बलवच्चिद्विलासानामनुवृत्त्या परस्परम् ।
स्वभावाः प्रतिबिम्बन्ति चिदादर्शे स्वभावतः ।। ५४
तत्रातियत्नाज्जयति सत्याः संविद आत्मसात् ।
कुर्वन्ति सरिदम्भोधिगामिनी सरितो यथा ।। ५५
ये समास्तत्र ते तावद्यतन्ते चित्स्वभावतः ।
यावदेको जयत्यत्र द्वितीयः स निमज्जति ।। ५६
जायमानेषु नश्यत्सु वर्तमानेषु भूरिशः ।
एवं सर्गसहस्रेषु परमाणुकणं प्रति ।। ५७
न किंचित्केनचिद्व्याप्तं न किंचित्केनचित्स्थितम् ।
चिदाकाशमिदं शान्तमतः सर्वमभित्तिमत् ।। ५८
अयमाभासते स्वप्नो निर्निद्रो दृष्टिवर्जितः ।
अवश्यंभाविबोधस्तु स्वनुभूतोऽप्यसन्मयः ।। ५९

पत्रपुष्पफलांशात्मा यथैकः स्वास्थितो द्रुमः ।

अनन्तसर्वशक्त्यात्मा ह्येक एव तथा विभुः ।। ६०

मातृमेयप्रमाणादिमायात्मकमजं पदम् ।

बुद्धं विस्मृतिमायाति न कदाचन कस्यचित् ।। ६१

शून्योदयास्तमयवस्तु तमःप्रकाशं

दिक्कालरूप्यपि सदैकमनादिशुद्धम् ।

आद्यन्तमध्यरहितं स्थितमच्छमम्बु

सौम्यत्ववीचिवलनाढ्यमिवैकमेव ।। ६२

अहंत्वमित्यादिजगत्स्वरूपा

विशुद्धबोधैकविभा विभाति ।

आकाशकोशे निजशून्यतेव

द्वैतैक्यसंकल्पविकल्पनाच्च ।। ६३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषूत्पत्तिप्रकरणे लीलो० प्रयोजनवर्णनं नाम षष्टितमः सर्गः ।। ६० ।।